National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 348-350
© 2026 NJHSR
www.sanskritarticle.com

**डॉ. हेम चन्द:**
प्रशिक्षितस्नातकशिक्षकः, संस्कृतम् ,
केंद्रीयः विद्यालयः उत्तरकाशी,
उत्तराखंड.

**Correspondence:**
**डॉ. हेम चन्द:**
प्रशिक्षितस्नातकशिक्षकः, संस्कृतम् ,
केंद्रीयः विद्यालयः उत्तरकाशी,
उत्तराखंड.

# ज्योतिषशास्त्रे उन्मादरोगविमर्शः

**डॉ हेम चन्दः**

भारतीयसमाजे अतिप्राचीनकालादेव धर्मार्थकाममोक्षरूपाणाम् चतुर्विधानां पुरुषार्थाणां प्राप्तिरेव जीवनस्य प्रमुखं लक्ष्यं स्वीकृतम् । अस्य लक्ष्यस्य प्राप्तये शरीरमेव प्रथमं साधनम्। अतोऽस्य देहस्य स्वस्थता आरोग्यत्वाय परमावश्यकी । देहस्य रक्षणविषये भगवता शंकरेणापि कुमारसम्भवे पञ्चमे सर्गे त्रयस्त्रिंशत्तमे श्लोके पार्वतीं कथितम् अस्ति यत् -

**शरीरमाद्यं खलु धर्मसाधनम् ।**[1]

अर्थात् धर्मसिद्धये प्रथमन्तावत् शरीरस्य स्वस्थता परमावश्यकी। यजुर्वेदेऽपि एकत्र शरीरस्य सुस्वास्थ्यसम्बन्धिनी एका ऋचा अस्ति ।

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥[2]

आयुर्वेदस्य तु परमोद्देश्यमेवास्ति स्वस्थमनुष्याणां रोगेभ्यः सर्वदा रक्षणं रोगायुक्तानाम्मनुष्याणाञ्च कृते उत्तमस्वास्थ्यप्रदानम्। आयुर्वेदे प्रमुखत्वेन रोगोत्पत्तिकारणानि प्रकारद्वयेन प्रतिपादितानि सन्ति। तदर्थं चरकसंहितायां उत्तरतन्त्रे चत्वारिंशत्तमे अध्याये एवं प्रकारेण वर्णनमस्ति -

**कर्मजाः व्याधयः केचिद् दोषजाः सन्ति चापरे ।।**[3]

सामान्यतः मिथ्याहारविहाराभ्यां रोगोत्पत्तिर्जायते यदि कश्चन जनः ऋत्वनुगुणम् आहारविहारे आचरति तदा सः कदापि रुग्ण: न भवति । केचन रोगाः एतादृशाः अपि भवन्ति ये अकस्मात् भवन्ति ।[4] ज्योतिश्शास्त्रज्ञाः कथयन्ति यत् पूर्वजन्मार्जितानि यानि पापकर्माणि भवन्ति तान्येवास्मिञ्जन्मनि व्याधिरूपेण जायन्ते । तद्यथा -

**जन्मान्तरकृतं पापं व्याधिरूपेण जायते ।**[5]

अत्र मया उन्मादरोगस्य विषये प्रतिपाद्यते। अयं रोगः कर्मजनितानां रोगाणां प्रभागे अन्तर्भवति। ज्योतिषशास्त्रस्य फलितस्कन्धे विविधानां रोगाणां भेदाः, लक्षणानि, चिकित्सोपायाः च विस्तरेण वर्णिताः सन्ति । यद्वर्णनम् ज्योतिषशास्त्रे उपलभ्यते तस्य वर्णनस्य साम्यं आयुर्वेदे स्पष्टरूपेण दरीदृश्यते। भावप्रकाशाख्ये ग्रन्थे चिकित्साप्रकरणे कथितमस्ति यत् वातपित्तकफानामुन्मार्गाश्रयत्वमेवोन्मादरोगस्य प्रमुखं कारणम् । चित्ते विक्षिप्तता एवोन्मादः।[6] सुश्रुतसंहितायामाचार्यः उन्मादरोगं मानसरोगनाम्ना स्पष्टीकरोति कथयति च यदुपचिताः दोषाः ( त्रिदोषाः) एव उन्मार्गे आश्रिताः सन् मनः एव विभ्रमयुक्तं कुर्वन्ति । अतः उन्मादरोगः मानसजन्यो भवति । यदायं प्रारम्भिकावस्थायां भवति तदायं मदनाम्ना ज्ञायते । यथोक्तमपि भावप्रकाशे -

स चाप्रवृद्धस्तरुणो मदसंज्ञा बिभर्ति।[7] अतः स्पष्टमस्ति यत् मनसि विकारः एव उन्मादारोगस्य मूलं कारणम् । मनसः कारकः चन्द्रः वर्तते अतः जन्मकुण्डल्यां चन्द्रस्य स्थितिरवश्यमेव विचारणीया।

उन्मादरोगस्य भेदाः -

उन्मादः वातपित्तकफैः पृथक् अतिशयत्वेन त्रयाणां दोषाणां सन्निपातेन, मानसिकदुखेन, विषेन च एवंविधप्रकारेण षट्प्रकारको भवति। ते षड् भेदाः क्रमशः सन्ति -

1. वातजन्योन्मादरोगाः ।
2. पित्तजन्योन्मादरोगाः।
3. कफजन्योन्मादरोगाः।
4. सन्निपातेनोन्मादरोगाः।
5. मानसिकदुखजन्योन्मादरोगाः।
6. विषजन्योन्मादरोगाः।[8]

आचार्यः चरकः पञ्चविधान् रोगान् स्वीकरोति । ते च भेदाः सन्ति -

1. वातजाः
2. पित्तजाः
3. कफजाः
4. सन्निपातजाः
5. आगन्तुकाः।[9]

उन्मादरोगस्य कारणानि -

यद्यपि रोगाणां कारणानि कानि लक्षणानि च कानि सन्ति विषयोऽयं चिकित्साशास्त्रस्य तथापि उन्मादादीनां मानसिकरोगाणां विषये ज्योतिषशास्त्रस्य ग्रन्थेषु पर्याप्तम् वर्णनमस्ति । प्रश्नमार्गे उन्मादस्य पञ्चविधभेदानां लक्षणैः सह विषमभोजनम् , अपवित्रभोजनम् , उपवासः, भयम्, वैराग्यम्, अकारणक्रोधः, शत्रुकृदभिचारः, गुरूनिन्दा, यज्ञादिकर्मसु त्रुटिः, देवनिन्दा, एतानि दश कारणानि कथितानि।[10] एतदतिरिच्य ज्योतिषशास्त्रे जातकस्य जन्मकुण्डल्याधारेण विभिन्नैः ग्रहैः निर्मितानां योगानां कारणेनापि उन्मादरोगस्य कारणानि ज्ञातुं शक्यते । यथा पूर्वोक्तानि दशकारणानि विभिन्नैः योगैः प्रश्नमार्गे प्रतिपादितम् ।

विषमभोजनेन उपवासेन चोन्मादः -

1. यदि चन्द्रः शुक्रः अष्टमेशश्च अष्टमस्थाने स्युः तदा विषमभोजनोपवासाभ्यां उन्मादो भवति।

अपवित्रभोजननैराश्यवैराग्याकारणक्रोधजनितोन्मादः -

2. यदि चन्द्रः शुक्राष्टमेशाभ्यां केतुश्च गुलिकराहुभ्यां युक्तौ भवेतां तदा अपवित्रभोजनेनोन्मादः, पञ्चमस्थाने पापग्रहाः स्युस्तदा भयेनोन्मादः अथ च यदि पञ्चमे भौमः स्यात् तदा वैराग्येण उन्मादो भवति ।
3. शत्रुकृदभिचारेणाग्निदेवतागुर्वादीनां शापेनोन्मादो भवति । ।[11]

अन्ये योगाः -

1. यदि मिथुनस्थे कन्याराशिस्थे वा सूर्ये गुरोर्दृष्टिः स्यात्तदा उन्मादरोगो भवति ।[12]
2. यदि कुण्डल्यां पञ्चमे स्थाने शनिः भवेत्तदा जातकः सुखापुत्ररहितः, मित्रारहितः, बुद्धिहीनः, अचेतः, उन्मत्तः, दीनश्च भवति ।[13]

उन्मादरोगस्य चिकित्सा -

वातजन्योन्मादाय चिकित्सा

वाताजन्योन्मादाय स्नेहपात्रम्, पित्तजन्योन्मादाय विरेचनम् करणीयम् ।[14]

कफजन्योन्मादाय नस्यम् वमनञ्च आगन्तुकोन्मादाय च सर्वं करणीयम्। आचार्यः चरकः एवं कथयति -

उन्मादे वातजे पूर्वं स्नेहपानम् विशेषचित।
कफपित्तोद्भवे त्वादौ वमनं सविरेचनम्।।[15]

स्नेहपानादिक्रियाणामतिरिच्य चिकित्साशास्त्रीयेषु ग्रन्थेषु जातक-ग्रन्थेषु च एकम् रामबाणौषधम् कथितम् तदस्ति 'कल्याणघृतम्'[16] सारावल्यां कल्याण वर्मा कथयति यद् यथा चन्द्रात् षष्ठसप्तमाष्टमस्थाः शुभग्रहाः समस्तान् अरिष्टान् नश्यति तथैव कल्याणघृतम् उन्मादं नश्यति । अत एवोक्तम् -

सप्तमाष्टमस्था शशिनः सौम्या हरन्त्यरिष्टफलम्।
पापैरमित्रचाराः कल्याणघृतं यथोन्मादम् ।।[17]

निष्कर्षत्वेन वयं वक्तुं शक्नुमः यच्चिकित्साशास्त्रैः सह ज्योतिषशास्त्रेष्वपि विविधैः योगैः उन्मदरोगस्य कारणानां लक्षणानां भेदानां चिकित्साविधीनाञ्च विषये पर्याप्तम् वर्णनं प्राप्यते । अतः यदि वयं कुण्डलीनां विश्लेषणं कृत्वा पूर्वमेव आगम्यमानस्य रोगस्य विषये जानीमस्तर्हि तस्य रोगस्य चिकित्सा रोगागमनात् प्रागेव कर्तुं शक्नुमः अथवा तस्य रोगस्य उपचारम् यौगिकक्रियाणां मन्त्रमणिरत्नौषधिनां साहाय्येन कर्तुं शक्नुम : । अस्माकं तु पुराकालादेव ध्येयवाक्यम् वर्तते-

ॐ सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःख भाग्भवेत् ।।[18]

**पाद टिप्पणी -**

[1] कुमारसम्भवम् पञ्चमसर्गः श्लोकसंख्या 33

[2] शुक्लयजुर्वेदसंहिता, अध्याय 36, मंत्र 24

[3] चरकसंहिता उत्तरतन्त्रम् अध्यायः 40

[4] सुश्रुतसंहिता उत्तरतन्त्रम् अध्यायः 40 श्लोकः 163

[5] प्रश्नमार्गः अध्यायः 12 श्लोकः 1

[6] भावप्रकाशः मध्यखण्डः अध्यायः 22 श्लोकः 1

[7] भावप्रकाशः मध्याखण्डः अध्यायः 22 श्लोकः 2

[8] सुश्रुतसंहिता अध्यायः 62 श्लोकौ 4,5

[9] चरकसंहिता चिकित्सास्थानम् उनमादचिकित्साध्यायः 9 श्लोकः 8

[10] प्रश्नमार्गः अध्यायः 12 श्लोकौ 44,45

[11] प्रश्नमार्गः अध्यायः 12 श्लोकः 48

[12] सारावली अध्यायः 22 श्लोकः 23

[13] सारावली अध्यायः 30 श्लोकः 75

[14] प्रश्नमार्गः अध्यायः 12 श्लोकः 41

[15] चरकसंहिता अध्यायः 1 श्लोकः 25

[16] प्रश्नमार्गः अध्यायः 12 श्लोकः 49

[17] सारावली अध्यायः 30 श्लोकः

[18] बृहदारण्यकोपनिषत्